*E-Āntarikī*, Vol-I, Issue-1, March 2026 ISSN: 3139-7573 (Online)

# प्राचीनसंस्कृतसाहित्ये वर्णितानां स्त्रीणां कार्यकौशलम् – एकम् अध्ययनम्

**सुश्री लोपामुद्रा गोस्वामी**
सहायकाचार्या संस्कृतसर्वदर्शनविभागः
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः
Email: loopamudragoswami03@gmail.com

**शोधसारः**

वैदिककाले स्त्रियः न केवलं गार्हस्थ्यजीवनस्य सुचारुव्यवस्थापनं चक्रुः , अपितु शिक्षा-कला-राजनीति-कुटनीत्यादिषु क्षेत्रेषु अपि ताः स्वकीयं कौशलं प्रदर्शितवत्यः। वैदिककाले स्त्रियः ज्ञान- विज्ञानयोः क्षेत्रेऽपि अग्रगण्याः आसन्। तस्मात् ज्ञायते यत् ताः केवलं गार्हस्थ्यपरिधौ सीमिताः नासन्, अपि तु बौद्धिकविकासेऽपि महत्त्वपूर्णां भूमिकां निर्वहुः। आयुर्वेदे गृह्यसूत्रेषु च वर्णिताः स्त्रियः स्वास्थ्यरक्षणे, समाजव्यवस्थापने, व्यवहारेषु निपुणाः आसन्। महाकाव्येषु चित्रितानि स्त्रीपात्राणि विविधेषु रूपेषु वर्णितानि यानि तासां विशिष्टकार्यकौशलं प्रदर्शयन्ति। नाट्यशास्त्रे अपि नायिकाभेदाः तासां मनोवैज्ञानिककौशलं सूचयन्ति। कालिदासादीनां काव्येष्वपि वर्णिताः स्त्रियः नैकविद्याकलागुणैः समृद्धाः। अर्थशास्त्रादिषु नार्यः राजकार्येषु, गोपनीयसेवायां, व्यापारव्यवस्थायां च नियोजनीयाः इति निर्दिष्टम्। एतस्माद् ज्ञायते यत् प्राचीनभारतीयसमाजे तासां सक्रिया भूमिका आसीत्। प्राचीनस्त्रिणां योगदानम् अद्यतनसमाजस्य अपि प्रेरणास्रोतं भवितुम् अर्हति। तस्यैव संक्षिप्तालोचनम् अत्र विधीयते।

**कूटशब्दाः** – स्त्रियः, कार्यकौशलम्, व्यापारः, कला, चिकित्सा, राजनीतिः।